[1]जूर्तिः,[A] ज्वरणा, जिज्वरिषा, जाज्वरा ;
ज्वरणम् , ज्वरणम् , जिज्वरिषणम् , जाज्वरणम् ;
ज्वरित्वा, ज्वरयित्वा, जिज्वरिषित्वा, जाज्वरित्वा ;
प्रज्वर्य, [2]प्रज्वरय्य, प्रजिज्वरिष्य, प्रजाज्वर्य ;
ज्वारम् २, } [3]ज्वरम् २-ज्वारम् २, } जिज्वरिषम् २, } जाज्वरम् २ ; }
ज्वरित्वा २, } ज्वरयित्वा २, } जिज्वरिषित्वा २, } जाज्वरित्वा २. }
[4]जूर्णिः.

(632) " ज्वल दीप्तौ " (I-भ्वादिः-831-804. अक. सेट्. पर.)

घटादिः, ज्वलादिश्च ।

ज्वालकः-लिका, [5]ज्वलकः-ज्वालकः, [6]प्रज्वलकः-लिका, जिज्वलिषकः-षिका, जाज्वलकः-लिका ;
ज्वलिता-त्री, ज्वलयिता-ज्वालयिता-प्रज्वलयिता-त्री, जिज्वलिषिता-त्री, जाज्वलिता-त्री ;
ज्वलन्-न्ती, ज्वलयन्-ज्वालयन्-प्रज्वलयन्-न्ती, जिज्वलिषन्-न्ती ; —
ज्वलिष्यन्-न्ती-ती, ज्वलयिष्यन्-ज्वालयिष्यन्-प्रज्वलयिष्यन्-न्ती-ती, जिज्वलिषिष्यन्-न्ती-ती ; —
— ज्वलयमानः-ज्वालयमानः-प्रज्वलयमानः, — [B]जाज्वल्यमानः ;

---

1. 'तितुत्र—' (7-2-9) इति, इण्णिषेधः । 'ज्वरत्वर—' (6-4-20) इत्युपधाव-कारयोरूठौ भवतः ।
2. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
3. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः ।
4. 'वीज्याज्वरिभ्यो निः' [द. उ. 1-18] इति निप्रत्ययः । ज्वरति, ज्वरणं वा जूर्णिः = रोगः । अत्र धातोः सम्प्रसारणोठादयो यथासम्भवमूह्याः ।
5. 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' (गणसूत्रं घटादौ) इति अनुपसृष्टे मित्संज्ञा विकल्पिता । मित्त्वपक्षे, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः । मित्त्वाभावपक्षे, उपधावृद्धिः । एवम् अनुपसृष्टे ण्यन्ते सर्वत्र रूपत्रयं ज्ञेयम् ।
6. उपसर्गसमभिव्याहारे तु घटादिषु पाठान्नित्यं मित्संज्ञा । तदानीं प्रज्वलकः, सञ्ज्वलकः इत्यादीनि रूपाणि ण्यन्ताद्भवन्ति । एवं सोपसर्गण्यन्ते सर्वत्र मित्कार्यं ज्ञेयम् ।

A. 'सुहृन्मनोजूर्तिकृतस्तथापि तस्मान्मदीयान्वयनाशवांशः ।' वा. वि. 3.28.
B. 'आज्वल्यमाना जगतः शान्तये समुपेयुषी ।' शिशुपालवधे 2.3.

Indologisches Seminar
der Universität Bonn